
ISSN 2395-4612

# परिमर्श

# Parimarsh

A National Interdisciplinary Research Journal Dedicated to Global Dialogue

Year-1, Volume-1 Bi-Annual Bi-Lingual



परिष्कार

College of Global Excellence

(Affiliated to the University of Rajasthan)

Shipra Path, Near Metro Mass Hospital, Mansarovar, Jaipur-302020

# Contents


| S.No. | Subject | Author | P. No. |
|---|---|---|---|
| 1. | संस्कृतवाङ्मये श्रीगणपतेः ब्रह्मपरकं स्वरूपम् | प्रो. विनोद कुमार झा | 6 |
| 2. | नाट्यशास्त्र में आस्वादक की अवधारणा (विशेष संदर्भ : प्रेक्षक, प्राश्निक और बुध) | डॉ. गोविन्द प्रसाद वर्मा | 8 |
| 3. | छायावादी गद्य : हिंदी गद्य का उत्तुंग शिखर और परवर्ती कविता का गोमुख | डॉ. सविता पाईवाल | 13 |
| 4. | आतंकवाद : इस्लाम और जेहाद | डॉ. खलील दीन | 18 |
| 5. | आधुनिक संदर्भ में तुलसी का काव्य | डॉ. रीता गौड़ | 22 |
| 6. | भारतीय लोकतंत्र : नैतिकता और संस्कृत वाङ्मय | प्रियंका जैन | 27 |
| 7. | राजस्थान में सुस्थिर विकास हेतु क्षेत्रीय विषमताओं का अध्ययन | डॉ. राकेश शर्मा | 30 |
| 8. | पाणिनिव्याकरण में सांस्कृतिक चेतना के स्रोत | डॉ. नमिता शर्मा | 36 |
| 9. | Development, Deprivation and Gender Equity in Uttarakhand | Dr. D.K.P. Choudhary | 41 |
| 10. | The Comprehensive Study of Indian Art | Dr. Jaya Mangalani | 49 |
| 11. | Chaetotaxy of Nymphs of Two Amblyceran Lice Populations | Dr. Smriti Saxena | 56 |
| 12. | Micro Climate Change a case of Barmer District in Rajasthan | Dr. Manoj Kr. Saini | 60 |
| 13. | Performance Evaluation Model: A New-Breakthrough in Assessment of Performance of Commercial Banks | Dr. Mini Jain | 64 |
| 14. | Role of Inflation in Investment Decision | Prahlad Sharma | 68 |
| 15. | Child psychology in Anita Desai's Games at Twilight and Studies in Park | Somya Sharma | 76 |
| 16. | Retaining Employees through Job Satisfaction | Vineeta Choudhary | 80 |

# संस्कृतवाङ्मये श्रीगणपतेः ब्रह्मपरकं स्वरूपम्

प्रो. विनोद कुमार झा

सृष्टिकर्ता ब्रह्मा जगत् सृजति, श्रीलक्ष्मीपतिर्जगत् पालयति, श्रीशंकरः जगतः संहारं विदधाति।

श्रीगणपतेर्गजवदनं सम्पूर्णं जगत् सृजति, पालयति लयञ्च करोति। यथा– **सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति।**[1]

गणानां पतिः गणपतिरुच्यते। सर्वेषु माङ्गलिककार्येषु गणपतेरादौ पूजनं स्मरणञ्च भवति। पूजनेन स्मरणेन च सर्वाः बाधाः दूरीभवन्ति। सर्वेषां विघ्नानां शमनेनैव कार्यपूर्तिर्जायते। प्रत्यक्षदेवतारूपेण, ब्रह्मरूपेण च प्रतिपादयते श्रीगणपतिः। यथा– **"नमस्ते गणपतये त्वमेव प्रत्यक्षं तत्त्वमसि, त्वमेव केवलं कर्तासि, त्वमेव केवलं धर्तासि, त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि"।**[2]

गणेशस्य गणपतेर्वा नामचर्चायां विचारोऽयं समुदेति यत् मनसा ग्राह्यं वचसा वर्णनीयं समस्तं भौतिकं जगत् गकारेणोत्पन्नं मनोवाग्भ्यामतीतं ब्रह्मविद्यास्वरूपं परमात्मतत्त्वं णकारं समवगच्छेत्। अध्यात्मविद्या परमात्मस्वरूपा भवति। यथोक्तं **अध्यात्मविद्या विद्यानाम्।**[3] गकारः कण्ठाद् ऊर्ध्वभागस्य गजमुखस्य तथा णकारः कण्ठाद् उदरपर्यन्तस्य, ईशशब्दः कटिभागस्य चरण्योश्च संकेतं प्रददाति–

**गकारः कण्ठोर्ध्वं गजमुखसमो मर्त्यसदृशो णकारः कण्ठाधो। जठर सदृशाकार इति च। अधोभागः कट्यां चरण इति हीशोऽस्य च तनुः।**[4]

विद्यायाः कलायाश्च अधिष्ठातृदेवरूपेणापि श्रीगणपतेर्नाम गृह्यते। यदा शिवः ताण्डवनृत्यं करोति तदा आनन्दमग्नो गणेशः स्वकण्ठेन मेघस्य इव मृदङ्गध्वनिं करोति–

**नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।**<br>
**मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे।।**[5]

निरुक्तकारो यास्को वदति– **यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति।** अर्थात् यया कामनाया कामनापूरकं देवं स्तौति ऋषिः स तद्देवमन्त्रो भवति। गणपतेः बीजं **"गं"** विद्यते। यथा– **गं गणपतये नमः** । वक्रतुण्डाद् गजाननपर्यन्तं द्वादशनामानि संध्यात्रये यः पठति स विघ्नविरहितो भूत्वा सम्पूर्णसिद्धिं लभते–

**प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्।**<br>
**तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्।।**<br>
**लम्बोदरं पञ्चमं च षष्ठं विकटमेव च।**<br>
**सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम्।।**<br>
**नवमं भालचन्द्रं च दशमं तु विनायकम्।**<br>
**एकादशं गणपतिं द्वादशं तु गजाननम्।।**<br>
**द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।**<br>
**न च विघ्नभयं तस्य सर्वसिद्धिः प्रजायते।।**[6]

अध्यात्मिकस्वरूपेण श्रीगणेशोऽजन्मा, अनादिः, अनन्तश्च विद्यते। निर्गुणः, निराकारः, निर्विशेषः परब्रह्मस्वरूपश्चास्ति। एकः सन् सर्वरूपः, त्रिनेत्रः, चतुर्भुजः, असंख्यनेत्रः, असंख्यमुखः, असंख्यपादः असंख्यहस्तश्च वर्णितो दरीदृश्यते। यथा– **त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रः त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम्।**[7]

अन्यच्च– **अजं निर्विकल्पं निराकारमेकं निरानन्दमद्वैतमानन्दपूर्णम्।**

**परं निर्गुणं निर्विशेषं निरीहं परब्रह्मरूपं गणेशं भजेम।।**[8]

श्री गणेश ओंकारस्वरूपश्च विद्यते। जगदुत्पत्तेः प्राक् ब्रह्मदेवकण्ठं भित्त्वा ओंकारः अथशब्दश्च प्रादुर्बभूवतुः प्रत्येकस्मिन् ग्रन्थारम्भे अथ संज्ञाकरणम् आदिलेखनाभिप्रायो अयमेव–

विनोद

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।[9]

भगवान् गणपतिरखिलविश्वाधारभूतश्चास्ति हे गणपते! भवद्विशालोदरे अशेषब्रह्माण्डं परिपूर्णमस्ति। अत एव लम्बोदरपदवाच्यो भवान्। भवान् तु साक्षात् ओंकारस्वरूपः— त्वं मूलाधारस्थितोऽस्ति नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्याययन्ति नित्यम्।[10]

अन्यच्च—

यं सदा मुनयो देवाः स्मरन्तीन्द्रादयो हृदि।
यं पूजयन्ति सततं ब्रह्मेशानेन्द्रविष्णवः।।[11]

ब्रह्मर्षयो नारदादयः, इन्द्रादिदेवाधिदेवाः हृदि तं ध्यायन्ति, अत एव सकलदेवाधिदेवानां ब्रह्माविष्णुरुद्रादीनां पूज्यो भवति श्रीगणपतिः तद्यथा—

यदाज्ञया सृष्टिकरो विधाता यदाज्ञया पालक एव विष्णुः
यदाज्ञया संहरको हरोऽपि ओंकाररूपी स गणेश ईरितः।।[12]

एवमेव संसारातीतः प्रणवस्वरूपः परमतत्त्वः श्रीगणेशः भक्तहितार्थं युगे—युगे अवतरन् तिष्ठति। चतुर्णां युगानां श्रीगणपतेः स्वरूपं भिन्नं—भिन्नं भवति। तद्यथा —

त्वं भूमिरापोऽनलोऽनिलो नभः।
त्वं चत्वारि वाक्पदानि।।[13]

श्री गणपतिरस्माकं रक्षां कुर्यात्। वयं गणपतिं नमस्कुर्यामः। श्रीगणपतिरेवास्य जगतः परिरक्षकः। तस्मै महिमामहिम्ने श्रीगणपतये नमः।। श्रीगणपतौ मम चित्तं सदा संलग्नं भवेत्। तद्यथा —

गणेशो वः पायात् प्रणमत गणेशं जगदिदम्
गणेशेन त्रातं नम इह गणेशाय महते।
गणेशान्नास्त्यन्यत् त्रिजगति गणेशस्य महिमा —
गणेशे मम चित्तं निवसतु गणेश त्वमेव माम्

चत्वारो वेदाः, अष्टादश पुराणानि, पृथग्—पृथग् युगभिन्नस्वरूपं गणपतिं परब्रह्मस्वरूपं प्रतिपादयन्ति—

अनेकमेकं गजमेकदन्तं चैतन्यरूपं जगदादिबीजम्।
ब्रह्मेति यं ब्रह्मविदो वदन्ति तं शम्भुसूनुं सततं भजामि।।

## सन्दर्भ—सूची


1. गणपत्यथर्वशीर्षम्
2. गणपत्यथर्वशीर्षम्
3. गीतायाम्, 10/32
4. श्रीगणेशमहिम्नः स्तोत्रम् — 09
5. दशरूपके— 1/1
6. सङ्कटनाशनं गणेशस्तोत्रम्
7. गणपत्यथर्वशीर्षम्
8. गणेशपुराणम्, उपासना — 13/3
9. नारदपुराणम् पू. भा. — 51/10
10. गणपत्यथर्वशीर्षम्
11. गणेशस्तवः
12. गणेशस्तवः
13. गणपत्यथर्वशीर्षम्


Vinod Jha

अध्यक्ष — व्याकरण विभाग,
श्री सोमनाथ संस्कृत यूनिवर्सिटी, वेरावल, गुजरात।
पिन नं. — 362266